इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क : 19/07/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- केन्द्रीयमन्त्री अमितशाहः उत्तराखण्डस्य रुद्रपुरे सप्तत्युत्तर-द्विशताधिकैकसहस्र-कोटिरूप्यकाणां विविधविकासकार्याणां उद्घाटनम्, शिलान्यासञ्च कृतवान्।
- केन्द्रीयमन्त्री अश्विनीवैष्णवः उक्तवान् यत् विकसित-भारतस्य लक्ष्यं साधयितुं भारतं द्रुतगत्या अग्रे सरति; विश्वस्तरीय-प्रौद्योगिकीनां उत्पादानां च विन्यासं कर्तुं युवव्यावसायिका: प्रार्थ्यन्ते।
- प्रवर्तन-निदेशालयेन आनलाइन-बेटिंग- एप्- इति प्रकरणानां विषये गूगल् -मेटा चेत्युभाभ्यां संचेतना प्रदत्ता।
- दमास्कस्-नगरे इस्रायल्-आक्रमणानन्तरं इस्रायल्-देशः सिरिया-देशश्च युद्धविरामाय सहमतौ स्तः।
- चतुरङ्ग-क्रीडायां, भारतदेशः प्रथमः अभवत् यत्र फ़ीडे-महिला-विश्वकप् इति क्रीडायाः प्रागुपान्त्यचक्रे चतस्रः क्रीडिकाः प्रविष्टाः अजायन्।

<u>अमितशाहः – उत्तराखण्ड</u>

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य रुद्रपुरे उत्तराखण्डसर्वकारस्य एकसप्तत्यधिक-द्विशतोत्तरैकसहस्र-कोटिरूप्यकाणां विविधकार्याणां उद्घाटनं शिलान्यासं चाकरोत्। श्रीशाहः पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षस्य उत्तराखण्डनिवेशमहोत्सवे देशस्य निवेशकैः उद्यमिभिः च सह संवादं कृतवान्। अस्मिन् अवसरे जनान् सम्बोधयन्

मन्त्री अवदत् यत् यावत् उत्तराखण्ड सदृशानां लघुराज्यानां प्रगतिः न भविष्यति तावत् देशस्य विकासः न भविष्यति, अतः केन्द्रसर्वकारेण लघुराज्यानां पूर्वीराज्यानां च विकासे विशेषं ध्यानं प्रदत्तम् अस्ति। श्रीशाहः अवदत् यत् अद्य उत्तराखण्डे एकलक्षकोटिरूप्यकाणां निवेशेन एकाशीतिसहस्राधिकानि वृत्यवसराणि सृज्यन्ते।

श्रीशाहः राज्यस्य मुख्यमन्त्रिणः प्रशंसां कुर्वन् पुष्करसिंहधामी इत्यस्य औद्योगिकविकासस्य पर्यावरणस्य च मध्ये सन्तुलनं स्थापितवान् इति अवदत्।

<u>अश्विनीवैष्णवः - विकासित-भारत्</u>

केन्द्रीयमन्त्री अश्विनीवैष्णवः अवदत् यत् विकसित्-भारत् इति लक्ष्यं प्राप्त्यर्थं प्रौद्योगिकीय-आधारः द्रुतगत्या सज्जीभवति इति। अद्य प्रातः आई .आई . टि.-हैदराबादे दीक्षान्तसमारोहे भारतस्य प्रौद्योगिक्याधारितं भविष्यं प्रकाशयन्, सः छात्रान् विश्व-स्तरीय-प्रौद्योगिक्योत्पादनानि च परिकल्पयितुं उद्बोधितवान्। श्रीवैष्णवः अस्मिन् वर्षे भारतस्य प्रथमस्वदेशीयस्य सेमिकण्डक्टर्-चिप् इत्यस्य प्रकाशनस्य उद्घोषणां कृतवान्, यत्र षट् सेमिकण्डक्टर्-संयन्त्राणि निर्मीयमाणानि सन्ति, येन भारतं प्रमुख-वैश्विक-पात्ररूपेण स्थाप्यते।

अवसरेस्मिन् श्रीवैष्णवः रेल्-परिष्कारविषये अपि अवधानं दत्तवान्, सप्तविंशत्यधिक-द्विसहस्रतमे वर्षे प्रथमस्य बुलॆट्-रेल्-यानस्य आरम्भः भविष्यति, तथैव चेन्नई-नगरे निर्मितस्य तृतीय-वंदेभारत्-संस्करणस्य निर्माणम् अपि भविष्यतीति।

श्री वैष्णवेन कृत्रिम बुद्धिमत्तायाः प्रशिक्षण कार्यक्रमाणां रूपरेखायाः स्थापनेन सह सप्तचत्वारिन्शदधिक-द्विसहस्रतम-वर्षं यावत् आर्थिक रुपेण उन्नतयोः द्वयोः राष्ट्रयोः एकं भारतम् अपि भवेदिति भावना प्रकटित।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

प्रवर्तन-निदेशालयः

प्रवर्तन-निदेशालयेन आनलाइन-बेटिंग- एप्- इति प्रकरणानां विषये गूगल् -मेटा चेत्युभाभ्यां संचेतना प्रदत्ता। सूत्रानुसारि ई. डी. इत्यनेन सोमवासरे देहली-मुख्यालये उपस्थातुं उभयोः संस्थयोः प्रतिनिधी आहूतौ। एतेषां आन्लैन्-बेटिं-एप्स् इत्यस्य प्रचारार्थं डिजिटल्-प्लेट्फ़ार्म्स् इत्यस्य भूमिकामपि निदेशालयः परीक्षते।

सिरिया-इस्रयेल् युद्धविरामः

अद्य इजराइल् देशेन सिरिया देशस्य उपरि कृतखमाक्रमणानन्तरं तुर्की-देशस्थः अमेरिकादेशस्य राजदूतः टाम् बराक् इत्येषः अवदत् यत् इस्रेल्-सिरिया-देशौ युद्धविरामाय सहमतौ अभवताम् इति । ध्यातव्यम् अस्ति यत् इजराइल् देशानुसारम् अरबस्थानां ड्रूज़् इति अल्पसङ्ख्यकमतानुयायिनां रक्षणाय आक्रमणमिदम् आसीदिति। सिरिया-देशस्य दीर्घकालीनशासकस्य बशर्-अल्-असद् इत्यस्य पतनात् आरभ्य सर्वकारीय-सैनिकानां ड्रूज़्-जनानाम् च मध्ये सङ्घर्षेषु अनेके जनाः मृताः। युद्धविरामस्य घोषणा तदा अभवत् यदा सिरिया-देशस्य दक्षिण-स्वीडा-प्रान्ते ड्रूज़्-समूहानां बेडोयिन्-समुदायानां च मध्ये सङ्घर्षः निरन्तरतया प्रचलन्नासीत्, येन त्रिशताधिकजनाः मृताः, अस्मिन् क्षेत्रे सहस्रशः जनाः विस्थापिताः च अभवन्, येन मानवीयसङ्कटः प्रारब्धः। अत्रान्तरे तुर्कि-देशस्य राष्ट्रपतिः रिसॆप् तय्यिप् एर्डोगान् इत्येषः ह्यः रशियादेशस्य राष्ट्रपतिना व्लादिमिर्

पुतिन् इत्यनेन सह दूरभाषया वार्तालापं कृत्वा सिरियादेशस्य संघर्षः, सम्पूर्णक्षेत्रस्य स्थिरतायै भयावहः अस्ति इति चिन्तां प्रकटितवान्।

## पीएम युवाध्यात्मिक सम्मेलनम्

प्रधानमन्त्री नरेन्द्र मोदी अद्य एकं लेखं प्रसारयन् अकथयत् यत् केन्द्रीयमन्त्रिणः मन्सुख् माण्डवीयः अस्मिन् लेखे विस्तृतरूपेण व्यख्यायितवान् यत् सम्मेलनम् कथं मादकद्रव्य-मुक्तभारतस्य निर्माणे साहाय्यं करोति इति।

## प्रधानमन्त्री-मङ्गलपाण्डे-

प्रधानमन्त्री नरेन्द्रमोदी अद्य स्वातन्त्र्ययोद्धां मङ्गलपाण्डे-वर्यमपि तस्य जन्मवार्षिकदिने श्रद्धाञ्जलिम् अर्पितवान्। एकस्मिन् सामाजिक-प्रसार-माध्यमे श्रीमोदी मङ्गलपाण्डे इत्येनं देशस्य प्रमुखः योद्धा इति प्रशंसाम् कुर्वन् उक्तवान् यत् सः ब्रिटिश्-शासनं विरुध्य स्वतन्त्रतायै समुपस्थितः अभवत् इति। मङ्गलपाण्डे वर्यस्य शौर्यस्य कथा राष्ट्रस्य जनानां कृते निरन्तरं प्रेरणास्रोतः भविष्यति इति सः अवदत्।

केन्द्रीय-गृह-मन्त्री अमितशाहः अपि मङ्गलपाण्डे इत्यस्मै सामाजिक-प्रसार-माध्यमद्वारा श्रद्धाञ्जलिम् अददात्, सः तस्मै देशभक्तेः प्रेरकः इति अवोचत्, विद्रोहस्य ज्वालायाः प्रज्वालने तस्य महत्त्वपूर्णां भूमिकां च अङ्गीकृतवान्।

## संसदः सत्रम्

सोमवासरतः आरभमाणस्य संसदस्य मानसून-सत्रात् पूर्वं सर्वकारेण श्वः सर्व-पक्षीय-सभा आहूता। सभायां, सर्वकारः संसदस्य उभयसदनयोः सुकरप्रक्रियां निश्चेतुं

सर्वेभ्यः राजनैतिकदलानां सहयोगं याचते। अस्य मासस्य एक-विंशतिः दिनाङ्कात् अग्रिममासस्य एक-विंशतिः दिनाङ्कपर्यन्तं प्रावृट्-सत्रस्य आयोजनं भविष्यति। सत्रे अनेके महत्त्वपूर्णाः विधयः चर्चायै, अंगीकाराय च स्वीकृताः भविष्यन्ति।

केरल-आई. आई. टी.-प्रधानः

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः अद्य अवदत् यत् सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षं यावत् भारतं विकसित-देशः भवितुं नियतः अस्ति, तथा च एतल्लक्ष्यं साधयितुं प्रत्येकस्य नागरिकस्य भूमिका अस्ति इति। सः केरलस्य पालक्काड्-नगरस्य आई. आई. टी. इति संस्थायाः सप्तमे दीक्षान्तसमारोहे सम्बोधयन् आसीत्। वैश्विक-डिजिटल्-क्षेत्रे भारतस्य वर्धमान-उपस्थितिं प्रकाशयन् प्रधानः अवदत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सम्पूर्णे देशे सर्वसमावेशकं नैतिकं च डिजिटल्-सार्वजनिकसंरचनायाः कल्पना कृता अस्ति इति।

उप्र-घटना

अद्य प्रातःकाले यमुना-एक्स्प्रेस्-वे इत्यत्र पृथक् पृथक् दुर्घटनयोः षट् जनाः मृताः, ऊनविंशति जनाः च व्रणिताः अभवन्। मथुरा-नगरस्य वरिष्ठ-आरक्षक-अधीक्षकः श्लोक्-कुमारः अवदत् यत् अद्य प्रातः त्रिवादने प्रथमा दुर्घटना अभवत्, यदा लघु-वाहनम् ट्रक्-इति यानेन सह सङ्घट्टितम् अभवत्, येन षट् जनाः मृताः, द्वौ च गभीरतया व्रणितौ अभवताम्। केवलं एकहोरानन्तरमेव दिल्लीतः मध्यप्रदेशं प्रति गच्छतः एकस्य निजी-बस इति वाहनस्य पतनेन सप्तदश यात्रिणः व्रणिताः अभवन्।

ऋतु - विभागेन

भारतीय-ऋतु-विज्ञान-विभागेन अद्य केरलस्य पश्चिम-राजस्थानस्य च केषुचित स्थानेषु अत्यधिक-वृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति। आगामि-त्रिषु दिनेषु कोङ्कण-गोवा-कर्नाटक-प्रदेशयोः विभिन्नेषु भागेषु अपि प्रचण्डतोधिकवृष्टिः भवितुम् अर्हति इत्यपि विभागेन सूचितम्। आकाशवाण्या सह संलापे विभागस्य वरिष्ठः वैज्ञानिकः डा. आर्. के. जेनामणिः अवदत् यत्, अद्य वायव्य-राजस्थाने अत्यधिकवृष्ट्यै रेड्-अलर्ट् इति रक्तसंचेतना दत्ता अस्ति।

चतुरङ्ग:

चतुरङ्ग-क्रीडायां, भारतदेशः प्रथमः अभवत् यत्र फ़ीडे-महिला-विश्वकप् इति क्रीडायाः प्रागुपान्त्यचक्रे चत्वारः क्रीडिकाः प्रविष्टा: अजायन्। ग्राण्ड्मास्टर्स् कोनेरु हम्पी, डी. हरिका, आर्. वैशाली इत्येताभि: सह अन्ताराष्ट्रियमास्टर् इति दिव्या-देशमुख इत्यनया च प्रतियोगितायाः अन्तिम-अष्ट-क्रीडिकासु प्रवेशोलब्ध्।

महिला क्रिकेट

महिला क्रिकेट-क्रीडायां टॉस इति प्रक्रियापि वर्षया वधितास्ति। एक दिवसीय-क्रीडात्रयाणां शृंखलायां भारतीयदलं एक-शून्याङ्कान्तरालेन अग्रे अस्ति।स्पर्धैषा इंग्लैण्डदेशस्य लॉर्ड्स इति क्रीडाङ्गणे क्रीडिष्यते।

।।इति वार्ता।।